# Parivardhita MAngala Ashtakam

# પરિવર્ધિતમઙ્ગલાષ્ટકમ્

## Document Information

Text title : Mangala Ashtakam 3

File name : mangalAShTakam3.itx

Category : deities_misc, mangala, aShTaka

Location : doc_deities_misc

Description/comments : This is extended version of mangalAShTakam2

Latest update : March 3, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 3, 2023

*sanskritdocuments.org*

# પરિવર્ધિતમઙ્ગલાષ્ટકમ્

હેરમ્બઃ સુરપૂજિતો ગુણમયો લમ્બોદરઃ શ્રીયુતઃ
શ્રીશુણ્ડો ગજકર્ણકો ગજમુખો ગમ્ભીરવિદ્યાગુણી ।
ગૌર્યાઃ પુત્રગણેશ્વરો હરસુતો ગોવિન્દપૂજાકૃતો
યાત્રાજન્મ-વિવાહકાર્યસમયે કુર્યાત્સદા મઙ્ગલમ્ ॥ ૧॥

શ્રીમત્પઙ્કજવિષ્ટરો હરિહરૌ વાયુર્મહેન્દ્રોઽનલ-
શ્ચન્દ્રો ભાસ્કરવિત્તપાલવરુણ-પ્રેતાધિપો નૈરૃતિઃ ।
પ્રદ્યુમ્નો નલકૂબરઃ સુરગજશ્ચિન્તામણિઃ કૌસ્તુભઃ
સ્વામી શક્તિધરશ્ચ લાઙ્ગલધરઃ કુર્વન્તુ નો મઙ્ગલમ્ ॥ ૨॥

ગઙ્ગાગોમતિ-ગોપતિર્ગણપતિ-ગોવિન્દગોવર્ધનો
ગીતા-ગોમય-ગૌરિજો-ગિરિસુતા-ગઙ્ગાધરો ગૌતમઃ ।
ગાયત્રી ગરુડો ગદાધરગયા ગમ્ભીરગોદાવરી
ગન્ધર્વગ્રહગોપગોકુલગણાઃ કુર્વન્તુ નો મઙ્ગલમ્ ॥ ૩॥

નેત્રાણાં ત્રિતયં શિવં પશુપતિમગ્નિત્રયં પાવનં
યત્તદ્વિષ્ણુપદત્રયં ત્રિભુવનં ખ્યાતં ચ રામત્રયમ્ ।
ગગાવાહપથ ત્રયં સુવિમલં વેદત્રયં બ્રાહ્મણં
સન્ધ્યાનાં ત્રિતયં દ્વિજૈરપિ યુતં કુર્વન્તુ નો મઙ્ગલમ્ ॥ ૪॥

વાલ્મીકિઃ સનકઃ સનન્દનમુનિર્વ્યાસો વસિષ્ઠો ભૃગુ-
ર્જાબાલિર્જમદગ્નિરાપજનકા ગર્ગાગિરોગૌતમાઃ ।
માન્ધાતા ભરતો નપશ્ચ સગરો જન્યો દિલોપો નૃપઃ
પુણ્યો ધર્મસુતો યયાતિ-નહુષઃ કુર્વન્તુ નો મઙ્ગલમ્ ॥ ૫॥

ગૌરી શ્રીરદિતિઃ સપર્ણજનની કદ્રૂમહેન્દ્રપ્રિયા
સાવિત્રી ચ સરસ્વતી ચ સુરભિઃ સત્યવ્રતાઽરુન્ધતી ।
સત્યા જામ્બવતી ચ રુક્મભગિની સ્વાહા પિતૃણાં પ્રિયા
વેલા પામ્બુનિધેઃ સમીનમકરાઃ કુર્વન્તુ નો મઙ્ગલમ્ ॥ ૬॥

શેષસ્તક્ષકકાલકૂટકુમુદાઃ પદ્મા તથા વાસુકિ-
    ર્યઃ કર્કોટકશઙ્ખપદ્મક ઇતિ ખ્યાતાશ્ચ યે પન્નગાઃ ।
અન્યે કાનનગહ્વરેષુ જલધૌ યે ચાન્તરિક્ષસ્થિતા-
    સ્તે પ્રાતઃ સ્મરણેન ચ પ્રતિદિનં કુર્વન્તુ નો મઙ્ગલમ્ ॥ ૭॥

ગઙ્ગા સિન્ધુ સરસ્વતી ચ યમુના ગોદાવરી નર્મદા
    કાવેરી સરયૂ મહેન્દ્રતનયા ચર્મણ્વતી વેણિકા ।
ક્ષિપ્રા વેત્રવતી મહાસરનદી ખ્યાતા ગયા ગણ્ડકી
    પૂર્ણજલૈઃ સમુદ્રસહિતાઃ કુર્વન્તુ નો મઙ્ગલમ્ ॥ ૮॥

લક્ષ્મીઃ કૌસ્તુભપારિજાતકસુરાજ ધન્વન્તરિશ્ચન્દ્રમાઃ
    ગાવઃ કામદુધાઃ સુરેશ્વરગજો રમ્ભાદિદેવાઙ્ગનાઃ ।
અશ્વઃ સપ્તમુખસ્તથા હરિધનુઃ શઙ્ખો વિષશ્ચામૃતં
    રત્નાનીહ ચતુર્દશ પ્રતિદિનં કુર્વન્તુ નો મઙ્ગલમ્ ॥ ૯॥

બ્રહ્મજ્ઞાનરસાયનં શ્રુતિકથા સદ્વૈદ્યકં જ્યોતિષં
    વ્યાકરણં ચ ધનુર્ધરં જલતરં મન્ત્રાક્ષરં વૈદિકમ્ ।
કોકં વાહનવાજિનં નટનૃતં સમ્બોધનં ચાતુરી
    વિદ્યાનામ ચતુર્દશપ્રતિદિનં કુર્વન્તુ નો મઙ્ગલમ્ ॥ ૧૦॥

બ્રહ્મા વેદપતિઃ શિવઃ પશુપતિઃ સૂર્યો ગ્રહાણાં પતિઃ
    શુક્રો દેવપતિનલો નરપતિઃ સ્કન્દશ્ચ સેનાપતિઃ ।
વિષ્ણુર્યજ્ઞપતિર્યમઃ પિતૃપતિસ્તારાપતિશ્ચન્દ્રમાઃ
    ઇત્યેતે પતયઃ સુપર્ણસહિતાઃ કુર્વન્તુ નો મઙ્ગલમ્ ॥ ૧૧॥

અશ્વત્થો વટચન્દનૌ સુરતરુર્મન્દારકલ્પદ્રુમૌ
    જમ્બૂ-નિમ્બ-કદમ્બ ચૂતસરલા વૃક્ષાશ્ચ યે ક્ષીરિણઃ ।
સ્વર્ગે યે પારિજાતકસુરા વૈભાજિતે રાજિતે
    રમ્યે ચૈત્રરથે ચ નન્દનવને કુર્વન્તુ નો મઙ્ગલમ્ ॥ ૧૨॥

ઇતિ પરિવર્ધિતમઙ્ગલાષ્ટકં સમ્પૂર્ણમ્ ।

*Parivardhita MAngala Ashtakam*

pdf was typeset on March 3, 2023

Please send corrections to *sanskrit@cheerful.com*